# ॥ गुरुवायुपुराधीश स्तोत्रम् ॥

**|| guruvāyupurādhīśa stotram ||**

**गरुडवाहनं पुण्यदर्शनं**

**वरझषाकृतिं वेदसङ्ग्रहम् ।**

**प्रळयकालजीवात्मतारकं**

**गुरुमरुत्पुराधीशमाश्रये ॥ १ ॥**

garuḍavāhanaṁ puṇyadarśanaṁ

varajhaṣākṛtiṁ vedasaṅgraham |

pra̱layakālajīvātmatārakaṁ

gurumarutpurādhīśamāśraye || 1 ||

**प्रणवमानसं प्राणजीवनं**

**प्रकटकच्छपाकारमीश्वरम् ।**

**अमृतदायकं नित्यनूतनं**

**गुरुमरुत्पुराधीशमाश्रये ॥ २ ॥**

praṇavamānasaṁ prāṇajīvanaṁ

prakaṭakacchapākāramīśvaram |

amṛtadāyakaṁ nityanūtanaṁ

gurumarutpurādhīśamāśraye || 2 ||

सुकृतकल्पकं सामतोषितं

सकलवैष्णवाकारसूकरम् ।

भुवनभूषणालङ्कृतं विभुं

गुरुमरुत्पुराधीशमाश्रये ॥ ३ ॥

sukṛtakalpakaṁ sāmatoṣitaṁ

sakalavaiṣṇavākārasūkaram |

bhuvanabhūṣaṇālaṅkṛtaṁ vibhuṁ

gurumarutpurādhīśamāśraye || 3 ||

वरदमीश्वरं नारसिंहकं

वपुषि भीकरं पुण्यपूरकम् ।

सुरगणावृतं भक्तवत्सलं

गुरुमरुत्पुराधीशमाश्रये ॥ ४ ॥

varadamīśvaraṁ nārasiṁhakaṁ

vapuṣi bhīkaraṁ puṇyapūrakam |

suragaṇāvṛtaṁ bhaktavatsalaṁ

gurumarutpurādhīśamāśraye || 4 ||

चरितविश्रुतं वामनाकृतिं

परमपूरुषं यज्ञसाधकम् ।

परपदप्रदं पापनाशकं

गुरुमरुत्पुराधीशमाश्रये ॥ ५ ॥

caritaviśrutaṁ vāmanākṛtiṁ

paramapūruṣaṁ yajñasādhakam |

parapadapradaṁ pāpanāśakaṁ

gurumarutpurādhīśamāśraye || 5 ||

भृगुकुलोद्भवं रामनामकं

सुगुणभासुरं रेणुकात्मजम् ।

नृवरतापसं केरळाधिपं

गुरुमरुत्पुराधीशमाश्रये ॥ ६ ॥

bhṛgukulodbhavaṁ rāmanāmakaṁ

suguṇabhāsuraṁ reṇukātmajam |

nṛvaratāpasaṁ keraḻādhipaṁ

gurumarutpurādhīśamāśraye || 6 ||

दशरथात्मजं रामभद्रकं

शरधनुर्धरं रावणान्तकम् ।

पुरुषमव्ययं श्रीनिकेतनं

गुरुमरुत्पुराधीशमाश्रये ॥ ७ ॥

daśarathātmajaṁ rāmabhadrakaṁ

śaradhanurdharaṁ rāvaṇāntakam ।

puruṣamavyayaṁ śrīniketanaṁ

gurumarutpurādhīśamāśraye ।। 7 ।।

वरहलायुधं रोहिणीसुतं

गिरिधराग्रजं रामदैवतम् ।

गजगणप्रियं धीमतां वरं

गुरुमरुत्पुराधीशमाश्रये ॥ ८ ॥

varahalāyudhaṁ rohiṇīsutaṁ

giridharāgrajaṁ rāmadaivatam ।

gajagaṇapriyaṁ dhīmatāṁ varaṁ

gurumarutpurādhīśamāśraye ।। 8 ।।

धृतसुदर्शनं कृष्णमच्युतं

विजयसारथिं गीतसारसम् ।

पशुप-गोपिका नर्तनप्रियं

गुरुमरुत्पुराधीशमाश्रये ॥ ९ ॥

dhṛtasudarśanaṁ kṛṣṇamacyutaṁ

vijayasārathiṁ gītasārasam ।

paśupa-gopikā nartanapriyaṁ

gurumarutpurādhīśamāśraye ।। 9 ।।

दशविधाकृतिं कल्किवैभवं

भुजगतल्पगं भूतभावनम् ।

निखिलरोगसंहारकारकं

गुरुमरुत्पुराधीशमाश्रये ॥ १० ॥

daśavidhākṛtiṁ kalkivaibhavaṁ

bhujagatalpagaṁ bhūtabhāvanam ।

nikhilarogasaṁhārakārakaṁ

gurumarutpurādhīśamāśraye ।। 10 ।।

॥ इति शिवम् ॥

|| iti śivam ||

www.kamakotimandali.com